International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 307-309
© 2017
www.anantaajournal.com
Received: 25-05-2017
Accepted: 05-07-2017

**डॉ. सीताराम गुर्जर**
सह आचार्य (साहित्य), राजकीय शास्त्री संस्कृत महाविद्यालय, दौसा, राजस्थान, भारत

**Corresponding Author:**
**डॉ. सीताराम गुर्जर**
सह आचार्य (साहित्य), राजकीय शास्त्री संस्कृत महाविद्यालय, दौसा, राजस्थान, भारत

# आसक्तिविषये नव्यमतम्

## डॉ. सीताराम गुर्जर

**सारांश:**
**शोधलेखेऽस्मिनासक्तिविषयमधिकृत्य शास्त्रसम्मता: विचारा: उपस्थापिता: वर्तन्ते । तत्र 'अव्यवधानेन पदार्थानामुपस्थितिरेवासक्ति:' इति राद्धान्त: स्वीकृत: बुधै: । आसक्तिज्ञानमिदं शाब्दबोधे सहकारिकारणम् । सिद्धान्तेनानेन ज्ञायते यत् पदार्थानामव्यवधान्वित्या उपस्थित्या शाब्दबोधो जायते । किन्तु पदार्थानामव्यवधानेऽप्यविलम्बेनोपस्थितिरपेक्षते यतोहि व्यवधानरहितपदार्थानां विलम्बेनोपस्थिति भवति चेत् शाब्दबोधो न भवति । अत: अविलम्बेनाव्यवधानेन च पदार्थानामुपस्थितिरेव आसक्तिरिति वक्तव्यम् । तथापि 'अव्यवधानेन पदार्थानामुपस्थितिरेवासक्ति:' इति सिद्धान्त: स्वीकृत: ।**

**कूटशब्द:** आसक्तिविषये नव्यमतम्, सिद्धान्तेनानेन, सहकारिकारणमिति सिद्धान्तः

## प्रस्तावना

शाब्दबोधे आसत्तिज्ञानमपि सहकारिकारणमिति सिद्धान्तः । आसक्ति: नाम अव्यवधानेन पदार्थानामुपस्थितिः । अभिहितं हि -
"कारणं सन्निधानं तु पदस्यासत्तिरुच्यते[1]"।।इति॥
यथा हि घटमानय इति अभिधीयमाने कम्बुग्रीवादिमत्पदार्थस्य कर्मत्वपदार्थस्य कृतिपदार्थस्य च उपस्थितिः अव्यवधानेनैव जायते अतः तेषां शाब्दबोधे भानम् सम्भवति । प्रहरे प्रहरे सहोच्चारितानि गामानय इत्यादीनि पदानि नैव शाब्दबोधजनकानि भवन्ति । यतो हि अत्र आसत्तिः नास्ति । ननु अत्र प्रश्नः, अव्यवधानेन पदानामुपस्थितिः एव आसत्तिरस्तु, किं पदार्थपर्यन्तानु-धावनेन इति, तत्र उच्यते - पदानामव्यधानेन उपस्थितिः आसत्तिः इत्यभिधीयमाने केषाञ्चित् व्यवधानेनापि पदस्य श्रवणानन्तरं पदार्थानामव्यवधानेनैव उपस्थित्या शाब्दबोधः अनुभवसिद्धः । यदि पदानामबिलम्बेन उपस्थितिः आसत्तिः इति अभिधीयते, तदा अत्र पदानामबिलम्बेन उपस्थितेरभावेऽपि शाब्दबोधस्य दर्शनेन व्यभिचारः स्यात्, अतः पदार्थानामबिलम्बेन उपस्थितिः आसत्तिः इति वक्तव्यम्। एवं सति पदार्थानां तु अत्र अव्यवधानेनैव उपस्थितिः वर्तते इत्यतः कारणमपि अस्ति, कार्यमप्यस्ति इति न व्यभिचारावसरः ।

इदमत्र ध्येयम् यत्, पूर्वमाकाङ्क्षायोग्यतादिस्थले तज्ज्ञानस्यैव कारणत्वम्, न तु स्वरूपतः तेषां कारणत्वमिति अभिहितम् । अन्यथा आकाङ्क्षादिभ्रमस्थले शाब्दबोधो न स्यात् । तदत्र नापेक्षितम्, यतो हि अत्र आसत्तेः स्वतो ज्ञानरूपत्वेन स्वरूपत एव तस्य कारणत्वेऽभिधीययमानेऽपि न दोषः ।

इदं तु प्राचीनमतम् नव्यानां मतं किञ्चिद्विलक्षणं वर्तते । तेषां मते हि आसत्तिः नाम नैव पदानामबिलम्बेनोपस्थितिः, अपि तु वृत्त्या पदजन्योपस्थितिरेवासत्तिः सा एव हि शाब्दबोधे कारणम् । एतेषां मतेऽपि आसत्तिः ज्ञानरूपैव अतः अत्रापि स्वरूपत एव कारणत्वमिति वक्तुं शक्यते । वृत्या पदजन्योपस्थितेः कारणत्वमिति वक्तुः अयमभिप्रायो वर्तते । पदज्ञानं पदार्थज्ञानं च वाक्यार्थबोधं प्रति कारणमित्यर्थः । इदञ्चावश्यमङ्गीकार्यम् । यतो हि कदापि पदादलभ्यमानः अर्थः शाब्दबोधे न भासते इति वक्तव्यमेव । अन्यथा गामानय इति वाक्यश्रवणकाले स्मृतानां घटानां शाब्दबोधे भानापत्तिः । तत्रापि प्रश्नः जायते यत् पदार्थो नाम कः ? पदजन्यप्रतीतिविषय एव पदार्थ इत्युच्यमाने घटपदं श्रुत्वा तदाश्रयस्य आकाशस्य स्मरणादाकाशस्य शाब्दबोधे भानापत्तिः । अत तद्वारणाय वृत्या पदजन्यप्रतीतिविषय एव पदार्थः इति वक्तव्यम् । वृत्तिश्च शक्तिर्लक्षणा वा । एवञ्च घटादिपदानां शक्त्या लक्षणया वा आकाशबोधकत्वाभावेन नाकाशस्य शाब्दबोधे भानापत्तिः । परन्तु एवं सति कश्चन दोषः स्यात्, घटमानय इति वाक्यात् न केवलं पदार्थ एव शाब्दबोधे भासते, अपि तु पदार्थयोः सम्बन्धोऽपि शाब्दबोधे भासते । यथा घटकर्मत्वयोः निष्ठत्वादिकम्। तस्य इदानीं शाब्दबोधे भानानुपपत्तिः । न चेष्टापत्तिः लोकविरोधस्य प्रत्यक्षत्वात् । एवं सति तादृशदोषवारणाय वृत्या पदजन्यपदार्थ एव शाब्दबोधे भासते इति नियमे कश्चन संकोचः कर्तव्यः । स चेत्थं- संसर्गभिन्नपदार्थः वाक्ये भासते चेत् वृत्या पदजन्यप्रतीतिविषय एव इति ।

नव्यानां मते आसत्तिलक्षणे वृत्तेः घटकत्वात् वृत्तिः नाम का इति विविच्य ज्ञातव्यम् । तत्र तावत् वृत्तिः इति पदम् अनेकशास्त्रेषु अनेकार्थेषु प्रसिद्धम् । यथा व्याकरणशास्त्रे हि वृत्तिर्नाम सूत्रस्य अर्थः । वामनजयादित्यादीनां ग्रन्था वृत्तिग्रन्था इति प्रसिद्धाः । तथैव वर्तनं वृत्तिः इति अन्यत्र प्रसिद्धम्। वृत्तिनियामकसम्बन्धाः इत्यादौ वृत्तिपदस्य अधिकरणत्वमर्थः । एवञ्च आधारनियामकसम्बन्धा इत्यर्थः। एवं रूपेण वृत्तिपदमनेकार्थबोधकं वर्वर्ति । अत्र आसत्ति लक्षणे घटकीभूतस्य वृत्तिपदस्य कः अर्थः? इति चेत्, अत्र वृत्तिपदम् शब्दगतधर्मवाचकम् । शब्दे हि वृत्तिः भवति । सा च अविनाभावेन सर्वत्र शब्दे तिष्ठति। शब्दादर्थे प्रतीयमाने वृत्तिरेव व्यापारभूता भवति । वृत्तिः कतिविधा इति प्रश्ने विवधमतानुसारं शक्तिलक्षणागौणीव्यञ्जनेत्यादिरूपेण वृत्तिः विविधमतेषु विविधा वर्तते । विशिष्य शक्तिलक्षणाख्या वृत्तिः सर्वमतेऽपि अङ्गीकृता । तत्र मुख्या वृत्तिः अभिधाख्या प्रसिद्धा । या एव शक्तिरिति नाम्ना व्यवह्रियते । शक्तिमत्त्वादेव शक्तं पदमिति व्यवहारो शास्त्रविदाम् ।

शब्दस्य स्वकीयः भवति अर्थः । शब्दस्य प्रयोजनमपि तत्रैव विश्राम्यति । यथा हि हस्तिहस्तिपकयोः सम्बन्धज्ञानानन्तरं हस्तिनं दृष्ट्वा हस्तिपकस्य स्मरणं जायते । हस्तिनं दृष्ट्वा हस्तिपकस्य स्मरणं जायते । तद्वत् शब्दः अपि अर्थं स्मारयति । एकसम्बन्धि ज्ञानमपरसम्बन्धिस्मारकमिति न्यायात् । तत्र यदि स्मरणं यथा कथञ्चिद्रूपेणाङ्गीक्रियते तदा पूर्वोक्तरीत्या घटपदे श्रुते स्मृतस्य आकाशस्य शाब्दबोधे भानापत्तिः अतः वृत्त्या स्मृतस्य इति वक्तव्यम्।वृत्तिः नाम शब्दार्थयोः सम्बन्धः । स च वाच्यवाचकभाव-बोध्यबोधकभावाख्यः प्रसिद्धः । ये हि ईश्वरं मन्यन्ते नैयायिकादयः ते हि इदं पदमिममर्थं बोधयतु इति ईश्वरेच्छामेव शक्तिं मन्यमानाः ईश्वरेच्छा एव शक्तिः, सा च विषयता सम्बन्धेन पदतदर्थयोः वर्तते इत्यतः स्वविषयकेच्छाविषयकत्वसम्बन्धेन शब्दार्थयोः मेलनं भवति । केचन हि शब्दार्थयोर्मध्ये तादात्म्यमङ्गीकुर्वन्ति । तेषां मते शक्तिः नाम तादात्म्यम् सम्बन्धः । शब्दार्थयोः तादात्म्यादेव क्वचित् एतयोः भेदः प्रतीयते, क्वचिच्चाभेदः । विष्णुमुच्चारय इत्यादौ शब्दार्थयोरभेदादेव शब्दे विद्यमानं उच्चारणकर्मत्वमर्थे संघटते । तयोः भेदस्य सत्त्वादेव हि लोके गुडशब्दोच्चारणेन न मुखे माधुर्यस्य प्रतीतिः । अत एवाभेदो नोक्तः । तादात्म्यं हि भेदसहिष्णुरभेदः ।

केचन हि निरीश्वरवादिनः मीमांसकादयः केवलं वाच्यवाचकभाव-सम्बन्धमेव शक्तिं मन्यन्ते । नवीनाः तावत् इदमेवाङ्गीकुर्वन्ति । अत एव हि आधुनिकसंकेतस्थलेऽपि पित्रादिभिः स्थापितानां देवदत्तादिपदानां शक्तिमत्वं सम्पद्यते। प्राचीनाः तावत् एकादशेऽहनि पिता नाम कुर्यात् इति श्रुत्या उक्तत्वात् तत्रापि ईश्वरेच्छा वर्तत एव इति अङ्गीकुर्वन्ति । एवञ्च सर्वेषां मतानां पर्यालोचने सति इदं तु सर्वत्र तुल्यं यत् शक्तिः इति कश्चन सम्बन्धः शब्दार्थयोः । स च यः कोऽपि वा भवेत् तादात्म्याख्यो वा वाच्यवाचकभावाख्यो वा । एवञ्च शब्दार्थयोः परस्परं सम्बद्धत्वात् एकसम्बन्धिज्ञानमपर-सम्बन्धिस्मारकमिति न्यायेन शब्दस्य अर्थस्मारकत्वं सिद्ध्यति ।

पुनः अत्र कश्चन प्रश्नः उदेति यत् अस्य शब्दस्य कुत्र शक्तिः इति कथं ज्ञायते ? तत्र उत्तरं तु शक्तिग्राहकप्रमाणादिभिरेव लब्धव्यम्।अभिहितं हि -

> "शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।
> वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः[2]" ।।इति।।

केषाञ्चन पदानाम् अनेका शक्तयः भवन्ति । ते हि नानार्थकाः इति अभिलप्यन्ते। यथा हर्यादयः । एतेषां पदानां श्रवणानन्तरं संयोगादिभिः शक्तिनियामकैः अर्थनिर्णयः कार्यो भवति । ते हि -

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थं प्रकरणं लिङ्गं शब्दस्यान्यत्र संस्थितिः।।
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[3]"।।
इत्यादिरूपेण शक्तिपरिच्छेदकाः भवन्ति ।

गङ्गायाम् घोषः इत्यादिशिष्टप्रयोगे प्रवाहे - तथैव लक्षणा इति अपरा वृत्तिःघोषसम्बन्धस्यअनुपपत्त्या गङ्गादिपदानां लक्षणावृत्त्या तीरादिवाचकत्वमङ्गीक्रियते । का नाम लक्षणा इति विचारे शक्यसम्बन्धः लक्षणा इति प्रसिद्धम् । यथा गङ्गापदस्य शक्यः अर्थः भवति प्रवाहः । तस्य सम्बन्धः तीरे भवति इत्यतः गङ्गापदतीररूपार्थयोः स्वशक्यसम्बन्धाख्य-सम्बन्धसत्त्वात् एकसम्बन्धिन्यायेन अर्थवाचकत्वं वक्तुं शक्यते । मीमांसकादयो हि स्वबोध्यसम्बन्धो लक्षणा इति अङ्गीकुर्वन्ति । तेषां हि मते लक्षणायां शक्तेः प्रवेशः न भवति । यतो हि तैः वाक्ये शक्तेः अभावेऽपि लक्षणा अङ्गीकर्तव्या भवति।यथा अर्थवादादिवाक्यानां प्राशस्त्यनिन्दादिषु लक्षणा अङ्गीक्रियते । एवञ्च अत्रापि पदलक्ष्ययोः सम्बन्धस्य सत्त्वादेवेकसम्बन्धिन्यायेनार्थबोधः । इयं हि लक्षणा मुख्यार्थबाधे स्वीक्रियते।मुख्यार्थबाधो हि तात्पर्यानुपपत्याङ्गीक्रियते । अन्वयानुपपत्तिमात्रं न मुख्यार्थबाध-प्रयोजकम्, यतो हि तथा सति यष्टीः प्रवेशयः इति यष्टिमति लक्षणास्थले यष्टीनां प्रवेशान्वये अनुपपत्तेः अभावेन लक्षणा न स्यात्, अतः तात्पर्यानुपपत्तिरेव लक्षणाप्रयोजकम् । इदानीं तु यष्टीः प्रवेशय इत्यादावपि तात्पर्यस्य वक्तुरिच्छारूपस्य अनुपपत्तेः सत्त्वेन न दोषः। लक्षणायां सम्बन्धाः पञ्च प्रसिद्धाः - ते हि -

"अभिधेयेन सम्बन्धात् सादृश्यात् समवायतः ।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता" ।।
इति ।

गङ्गायां घोषः, मुखं चन्द्रः, उपकृतं बहु तत्र किमुच्यते, इत्यादीनि उदाहरणानि प्रसिद्धानि ।

गौणी वृत्त्यन्तरमिति मीमांसकादयः अङ्गीकुर्वन्ति। यथा सिंहो माणवकः इत्यादौ सिंहशब्दप्रयोगः गौणः । नैयायिकादयः तावत् लक्षणायामेव अस्याः वृत्तेः अन्तर्भावमङ्गीकुर्वन्ति ।

तथैव व्यञ्जना इति अपरा वृत्तिः आलङ्कारिकैरङ्गीकृता । सापि शब्दशक्तिमूला, अर्थशक्तिमूला चेति विभक्ता, तत्र शब्दशक्तिमूला व्यञ्जना नाम यत्र शब्दादेव व्यङ्ग्यार्थः प्रतीयते । यथा दूरस्थाः भूधराः रम्याःइत्यादौ शक्त्या दूरे विद्यमानाः पर्वता रमणीया इत्यर्थः, व्यङ्ग्यार्थस्तु राजानः दूरे विद्यमाना एव रमणीया भवन्ति इति । अर्थशक्तिमूला व्यञ्जना नाम यत्र शब्दान्न व्यङ्ग्यार्थः प्रतीयते, अपि तु स्वतन्त्ररूपेण, यथा नायिकया गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयात् यत्र गतो भवान् इति उक्ते सति हे प्रिय भवद्गमनोत्तरकालिकप्राणवियोगवती इति व्यङ्ग्यार्थः प्रतीयते । इयमर्थशक्तिमूला । इति अभिधीयते । तत्र शब्दशक्तिमूला शक्तावेव अन्तर्भवति, अर्थशक्तिमूला च अनुमाने अन्तर्भवति इति नास्या आवश्यकता इति नैयायिकादयः । एवञ्च एतादृशविविधवृत्तिभिः पदजन्यप्रतीतिविषयः शाब्दबोधे भासते तादृशवृत्तिज्ञानमेव कारणमिति नव्यानामाशयः ।

**References**

1. कारिकावली.का.सं-८३ ॥
2. कारिकावली.का.सं-८६॥
3. वाक्यपदीयम् ॥२.३१५.